International Journal of Sanskrit Research 2020; 6(5): 10-13

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(5): 10-13
© 2020 IJSR
www.anantaajournal.com
Received: 08-07-2020
Accepted: 10-08-2020

**डॉ. अखिलेशकुमारमिश्रः**
सहायकप्राचार्यः
स्नातकोत्तरवेदविभागः
का॰सिं॰द॰सं॰वि॰वि॰दरभङ्गा,
बिहार, भारत

**Corresponding Author:**
**डॉ. अखिलेशकुमारमिश्रः**
सहायकप्राचार्यः
स्नातकोत्तरवेदविभागः
का॰सिं॰द॰सं॰वि॰वि॰दरभङ्गा,
बिहार, भारत

# वृष्टिविज्ञानसमीक्षणम्

## डॉ. अखिलेशकुमारमिश्रः

**DOI:** https://doi.org/10.22271/23947519.2020.v6.i5a.1083

### प्रस्तावना

वैदिकवाङ्मये वृष्टिविज्ञानस्य सर्वातिशायित्वं सर्वत्र समवलोकितं भवति। पर्यावरणसंरक्षणदृष्ट्यापि वृष्टिविज्ञानस्य महत्त्वं प्राचीनैर्महर्षिभिः तत्त्वज्ञैश्च नितरां स्वीक्रियते। पञ्चमहाभूततत्त्वेष्वपि जलस्य स्थानमतीव महनीयमस्ति । वृष्टिविज्ञानस्य पर्यालोचनक्रमे तथ्यमिदं समुद्भवति यज्जलं जीवनाय परमावस्यकं तत्त्वमस्ति। जलं विना जीवनस्यकल्पना कदापि न कर्तुं शक्यते । सर्वेषां भूतानाङ्कृते जलं सर्वथा जीवनधायकं तत्त्वम्। अस्माकं शरीरमिव पृथिव्याः त्रिषु भागेषु सर्वत्र जलस्यैव स्थितिः नितरां समवलोक्यते । अस्यां स्थितौ वैदिकवाङ्मये जलस्याधिपतिरूपेण वरुणदेवस्योपासनायाः निर्देशः दृश्यते। अयं हि वृष्टिकारको देवः । अस्य देवस्यानुकम्पयैव पृथिव्यां वृष्टिर्भवति, सस्यानि समुद्भवन्ति, ओषधयः वृक्षाश्च समुत्पन्नाः जायन्ते। नद्यः प्रवहन्ति। पर्यावरणस्य संरक्षणं सर्वत्र दृष्टिगोचरं भवति। सर्वे जन्तवः तृप्ताः समवलोक्यन्ते । अतः पर्यावरणशुद्ध्यर्थं प्रदूषणानां निवारणाय च वृष्टेर्महत्त्वं सर्वत्र वैदिकवाङ्मये महर्षिभिः स्वीकृतम्। न केवलं प्राचीनैर्महर्षिभिः, अपितु अर्वाचीनैर्वैज्ञानिकैरपि वृष्टिविज्ञानस्येतद् रहस्यं समुद्घाटितमस्ति । सुवृष्ट्यैव ओषध्यादीनि अन्नानि च क्षेत्रे उद्भवन्ति । अतः पञ्चभूतेषु आद्या सृष्टि जलमेव । यथोक्तं मनुना –

**अप एव ससर्जादौ तासु बीजमक्षिपत् ।**[1.]
**आपो नारा इति प्रोक्ता आपो वै नर सूनवः । ता यदस्यान्नयं तेन नारायणः स्मृतः ।।**

वस्तुतस्तु वृष्टिं विना परमात्मना सृष्टिरपि न विहिता, न च कर्तुं पार्य्यते । जलेन वृष्ट्यादिकर्मणा वा सर्वेषु भुवनेष्वपि सृष्टिप्रक्रिया संचालिता भवति। सर्वेषु लोकेषु स्थानेषु वा जलेनैव सर्वाणि क्रियाकलापानि संसिद्धानि जातानि भवन्ति। वृष्ट्यादि कर्मणा पर्यावरणस्य सम्यक्तया संशुद्धिर्भवति, यतस्तु जले संशोधिका शक्तिः राजते । एतदर्थं सर्वेषु पूजन – कर्मसु यज्ञेषु वा जलस्य स्थितिः परमावश्यकी भवति। जलेनैव आचमनादिक्रियया शुद्धिः क्रियते । अस्य जलतत्त्वस्य विज्ञानशास्त्रे समुपयुक्तानि इमानि नामानि सन्ति – एक्वा, हाईड्रोजन मोनो ऑक्साइड, हाईड्रोजन हाइड्राक्साइड इति । जलस्य अणु सूत्रमस्ति – $H_20$ एवञ्च मोलर द्रव्यमानमस्ति- 18.0153 g mol । वृष्टिद्वारा सम्प्राप्तजलेन अस्माकङ्कृषिकर्म सफलं भवति। सा च वृष्टिः सर्वान् अस्मान् च प्रसीदति। जलचक्रानुसारेण यदा सामुद्रिकं जलमुपरि गच्छति वाष्परूपेण, तदा तज्जलं मधुरं भूत्वा वर्षति। वैदिकवाङ्मये अस्य वृष्टिकर्मणः मूलमस्ति यज्ञादि श्रेष्ठतमं कर्म। श्रौतयज्ञादिकर्मणा स्मार्त्तकर्मणो वा वृष्ट्यादि फलं समुद्भवतीति यज्ञविज्ञानस्य

मूलमुद्देश्यम्। वेदानां मूलभूतं लक्ष्यमस्ति यत् यज्ञादि - कर्मसम्पादनेन वृष्ट्या भूतानां सर्वविधकल्याणकरणम्। वस्तुतः लोककल्याणाय एव यज्ञादयः अनुष्ठीयन्ते । इज्यन्ते सङ्गतीक्रियन्ते। विश्वकल्याणाय परिश्रमं कृत्वा महान्तो विद्वान्सः आह्वयन्ते अस्मिन्निति यज्ञः । यथाह्युक्तं मत्स्यपुराणे –

देवानां द्रव्यहविषां ऋक्सामयजुषां तथा ।
ऋत्विजां दक्षिणानां च संयोगो यज्ञ उच्यते ।। [2]

भगवता मनुनाऽपि एवमेवोक्तम् -

अग्नौ प्रस्ताहुतिः सम्यग् आदित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजा ।। [3]

प्रश्नोऽयमत्रसमुजृम्भते यत् अग्नौ प्रक्षिप्याहुतिः कथमादित्य मण्डलं प्रति गच्छति । एतस्य वैज्ञानिकं समाधानमेवमस्ति यत् अग्नौ प्रक्षिप्ता आहुतिः द्रव्यं वा विद्युत्कणीभूतं स्वरूपं (lionised) सम्भवति। सूर्यस्य chrge positeve अस्ति तस्य मात्रा (voltage) अपि दीर्घतमा अस्ति। अनेनैव कारणेन सूर्यः तडित् कणिकां (negative electrnd) आकर्षणबलेन आकर्षति। आधुनिकवैज्ञानिकेषु अरहयनिसप्रभृतयः वैज्ञानिकाः वैदिकवृष्टिविज्ञानस्य तथ्यमिदं स्वीकुर्वन्ति।

मेघस्य निर्माणप्रक्रिया - सूर्यः स्वकिरणैः पृथिव्यां नदीनां, समुद्रादीनाञ्च जलं वाष्प रूपेण आकृष्य आकाशोपरि नयति। तत्र च वाष्पः रजकणैः सह सम्मिल्य शीतलवायोः सम्पर्कात् घनीभूतं सञ्जायते । तत्रस्थितस्य वाष्पस्य परिपक्वावस्थायामेकं परिवर्तनं सञ्जायते। तद् परिवर्तनमेव मेघस्य स्वरूपम् अवगन्तव्यमस्माभिः। अर्थात् यज्ञादि कर्मणा यो धूमः उपरि गच्छति, स तत्र विद्युत्कणे परिवर्तितो भवति। तदनु च घनीभूतो मेघः विनिर्मीयते। धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः ? [4] इति।एवमेव यज्ञे संस्थापिते अग्नौ प्रक्षिप्तानि हविर्द्रव्याणि धूमरूपेण उपरि गच्छन्ति। हुतद्रव्येषु किञ्चित् रूपं वाष्परूपेण अग्नितः निर्गच्छति। उपरि एते सर्वे सम्मिल्य मेघस्वरूपं विदधति। अर्थात् वाष्पस्य घनीभूतो अंशः मेघरूपेण ज्ञायते। एतत्सर्वं परीक्षणं Helmholtz प्रभृतयः वैज्ञानिकाः कृतवन्तः । वेदे नैकाः मन्त्राः सन्ति येन सिद्धं भवति यज्जले अग्नितत्त्वं निहितमस्ति। अर्थात् अग्निः जलस्य गर्भे निवसति। अथर्ववेदे यथोक्तम् - अग्नोपत्तिम् अपामसि, गर्भो यो अपां, गर्भोवनानां....।[5] यदा मेघः विनिर्मितो भवति, तदा यथासमयं वृष्टिरूपेण पृथिव्यां समागच्छति। एतत्सर्वं क्रियाकाण्डं जलचक्रे निष्पद्यते । यथोक्तम् ऋग्वेदे –

कृष्णं नियानं हरयः सुवर्मा। अपो वसाना दिवमुत्पतन्ति ।। [6]
समानमेतदुकम् उच्चैत्यवचाहभिः। भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वत्यग्नयः ।। [7]

तैत्तिरीयसंहितायां मरुत्, अग्निः,सोमः,सूर्यश्च वृष्टिकर्मणः कारणानि सन्ति। अर्थात् एतेषां वृष्टिकर्मणि महद्योगदानमस्ति। एतेषु मित्रः (oxygen) वरुणः (hydrogen) परस्परमेकीभूय जलं निर्माति । उभौ मिलित्वा परम्परया जलनिर्माणस्य प्रक्रियां सदैव कुरुतः । यथोक्तमथर्ववेदे - अपाम् अग्निः, आपो विद्युत् वर्ष, मरुद्भिः प्रच्युता मेघा ।[8] अपि च शतपथब्राह्मणेऽपि एवमुक्तं यत् अग्नितः धूमो जायते, धूमात् अभ्रः (मेघः) अभ्राद् वृष्टिः सञ्जायते। यथा – अग्निर्वैधूमोजायते, धूमादभ्रम्, अभ्राद्वृष्टिः। [9] एवम् – देवाः पुरोवातं ससृजिरे, अभ्राणि समप्लावयन्, विद्युतम् ..... एतमयित्नुम् ....... प्रवर्षयन् ।[10] बृहदारण्यकोपनिषदि प्रोक्तं यत् अग्नौ देवगणः सोम – द्रव्याणामाहुतिं ददाति, येन वृष्टिर्भवति पृथिव्याम् । अत एव वायुः, अभ्रः, विद्युत्, अशनि, सोमीयद्रव्याणि उपकरणानि सन्ति वृष्टेः । यथाहि – पर्जन्यो वावगौतमाग्निः, तस्य वायुरेव समिद्, अभ्रं धूमो, विद्युदर्चिः, अशनिरङ्गाराः, ह्रादुनयो विस्फुलङ्गाः। [11] वैदिकवाङ्मये सुवृष्टये यज्ञादयः श्रेष्ठतमानि कर्माणि अनुष्ठीयन्ते। दर्शपूर्णमासयागे वृष्ट्यर्थं पलाशशाखाच्छेदनम्, इषे त्वा इति मन्त्रेण क्रियते । एवमेव वृष्ट्यर्थं नैकाः श्रौतयागाः प्रवर्तन्ते, येन सदनुष्ठानेन सुवृष्टिः नूनमेव समागच्छति । तैत्तिरीयसंहितायामुक्तं यत् वृष्टये कारीरीयकी इष्टिः नूनमेव विधेया। एतत् क्रमे वर्षायाः अष्टौ भेदाः निरूपितास्सन्ति । ते हि – 1. जिन्वरावृत् 2. पूर्त्तिरावृत् 3. भीमरावृत् 4. त्वेषरावृत् 5. पूर्तिरावृत् 6. श्रुतरावृत् 7. विराड् आवृत् 8. भूतरावृत् इत्यादयः । [12] वृष्टिप्राप्तये त्रयाणां भूर्भुवः स्वः लोकानां सहयोगः नितरामपेक्षते । यथा ह्युक्तम् – दिवायान्ति मरुतो भूम्या अग्निः, अयं वातो अन्तरिक्षेण याति ।, अद्भिर्याति वरुणः समुद्रैः [13] मरुद्देवः वृष्टये सामुद्रिकं जलमन्तरिक्षं प्रति गमयति। पुनश्च मित्रावरुणौ वृष्टिकर्त्तारौ स्तः । मित्रः प्राणशक्तिः (oxygen) अस्ति । वरुणश्च अपानशक्तिः ऋणात्मिका शक्तिः (hydrogen) इति नाम्ना ज्ञायते । विद्युत् संचारेण उभौ जलरूपेण परिवर्तितौ सञ्जातौ । तदैव वृष्टिः सम्भवति। अत एव वैदिकवाङ्मये मित्रावरुणौ वृष्टिप्रदायकौ देवौ स्तः । सर्वेषां भूतानाङ्कृते अन्नादीनां व्यवस्थापनमनयोः प्रमुखं कार्यमस्ति। अन्तरिक्षस्थजलेन सह वरुणदेवस्य घनिष्ठतमसम्बन्धोऽस्ति । अस्य देवस्य नियममनुसृत्य नद्यः प्रवहन्ति, वृष्ट्यो भवन्ति च । अनावृष्टिकाले वरुणदेवस्योपासना वैदिकालादेव प्रचलितास्ति। अयं हि समुद्रस्य देवः, जलस्य स्वामी रूपेण राजते । अतः वृष्ट्यर्थमस्योपासना नूनमेव अस्माभिः करणीया, तदैव वृष्टिविज्ञानमवगन्तुं वयं समर्थो भवेम ।

अतः वृष्टिविज्ञानस्य मूलाधारतत्त्वमस्ति यज्ञादिकर्म एव । यथोक्तं गीतायाम् –

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्म समुद्भवः ।। [14.]
तथा च – यज्ञाद्देवाः प्रजाश्चैव यज्ञादन्ननियोगिनः ।
सर्वेयज्ञात्सदाभावि सर्वं यज्ञमयं जगत् ।। [15.]
अपि च – यज्ञे विनष्टे सकलाः प्रजाः क्षुद्भयकारकाः ।
वृष्ट्याभावान्महद् दुःखं प्राप्य नष्टाश्च काञ्चन ।। [16.]

अतः पौर्वापर्यविवेचनेन ज्ञायते यत् वृष्टिप्राप्तये श्रौतस्मार्त्तयज्ञादीनामनुष्ठानमतीव आवश्यकम् । यज्ञादि-कर्मणा अभ्रनिर्माणं नूनमेव भवति, तदैव जलचक्रानुसारेण पृथिव्यां वृष्टिः संजायते, प्रजाश्च सुखिनो भवन्ति। अत एवोक्तम् ऋग्वेदे - आनोभद्राः क्रतवो यन्तु विश्वतः । [17.] Let noble thonghts come to ws from every sioles. सन्दर्भेऽस्मिन् बृहत्संहितायां वराहमिहिरोऽपि ब्रूते यत् यदि एतानि पञ्चलक्षणानि यदि स्युः तर्हि मेघनिर्माणाय आकाशे गर्भाधानं सम्यक् भवति। तथाहि –

पवनसलिलविद्युतगर्जिताऽभ्रान्वितो यः, स भवति बहुतोयः पञ्चरूपाभ्युपेतः ।
विसृजति यदि तोयं गर्भकालेऽतिभूरि, प्रसवसमयमित्वा शीकराम्भः करोति ।। [18.]

तदित्थं कृषिकर्मणि वृष्टिविज्ञानसमीक्षणमिति संक्षेपेण प्रदर्शितम् । इति शम्।।

सन्दर्भग्रन्थसूची


1. मनुस्मृतिः – 1.8, 10 मनुस्मृतिः, सम्पादकः – गङ्गानाथझाः,प्रथमो भागः, प्रकाशकः - परिमल पब्लिकेशन्स दिल्ली- 11007, संस्करण-2004ई०।
2. मत्स्यपुराणम् – 144/44 मत्स्यपुराणम्, सम्पादकः – पण्डित कालीचरणगौड, प्रकाशक- चौखम्बा विद्याभवन वाराणसी – 221001, पो. बा.नं. 1061, संस्कपण – 2001ई.।
3. मनुस्मृतिः – 3.76 मनुस्मृतिः, सम्पादकः – गङ्गानाथझाः,प्रथमो भागः, प्रकाशकः - परिमल पब्लिकेशन्स दिल्ली- 11007, संस्करण-2004ई०।
4. मेघदूतः – श्लोकसङ्ख्या - 5 महाकविकालिदासविरचितं मेघदूतम्- व्याख्याकारः – श्री वैद्यनाथ झा शास्त्री, प्रकाशकः चौखम्बा कृष्णदास अकादमी, वाराणसी, पो. बा. नं. 1118, वाराणसी – 221001, संस्करण – षष्ठ, वि. सं. 2067, सन् - 2010ई.।
5. अथर्ववेदः – 1.70.2 अथर्ववेदः सायणभाष्यसहितम्, प्रथमो – भाग, सम्पादकः – शंकर पाण्डुरंग पण्डित,प्रकाशक- कृष्णदास अकादमी, पो. बा. नं. 1118, वाराणसी-221001, संस्करण- पुनर्मुद्रित, वि.सं.2045
6. ऋग्वेदः – 1.164.47 सायणभाष्यकृत ऋग्वेदसंहिता -, सम्पादक – पण्डित रामगोविन्द त्रिवेदी, प्रकाशक – चौखम्बा विद्याभवन वाराणसी, पो.बा. नं. 1069, वाराणसी – 221001, पुनर्मुद्रितसंस्करण – 2011, भाग – 1-5 तक।
7. ऋग्वेदः- 1.164.51, सायणभाष्यकृत ऋग्वेदसंहिता -, सम्पादक – पण्डित रामगोविन्द त्रिवेदी, प्रकाशक – चौखम्बा विद्याभवन वाराणसी, पो.बा. नं. 1069, वाराणसी – 221001, पुनर्मुद्रितसंस्करण – 2011, भाग – 1-5 तक।
8. अथर्ववेदः- 4.15.9-10, अथर्ववेदः सायणभाष्यसहितम्, प्रथमो – भाग, सम्पादकः – शंकर पाण्डुरंग पण्डित, प्रकाशक- कृष्णदास अकादमी, पो. बा. नं. 1118,वाराणसी-221001,संस्करण- पुनर्मुद्रित, वि.सं.2045
9. शतपथब्राह्मणम् – 5.3.5.17, श्रीसायणहरिस्वामिभाष्यसमेते- शतपथब्राह्मणम्, प्रथमो भागः, प्रकाशकः –ज्ञानपब्लिशिंग- हाउस, 29/6, शक्तिनगरम्, देहली- 110007, प्रथमं पुनर्मुद्रणं– 1987 तमे वर्षे ।
10. श.ब्रा. 1.5.2.18 श्रीसायणहरिस्वामिभाष्यसमेते- शतपथब्राह्मणम्, प्रथमो भागः, प्रकाशकः – ज्ञानपब्लिशिंग- हाउस,29/6, शक्तिनगरम्, देहली- 110007, प्रथमं पुनर्मुद्रणं – 1987 तमे वर्षे ।
11. बृहदारण्यकोपनिषद् – 6.2.9, बृहदारण्यकोपनिषद् सानुवाद शाङ्करभाष्यसहित, प्रकाशक- गीताप्रेस, गोरखपुर – 273005, सं. 2071 सत्रहवाँ पुनर्मुद्रण।
12. तैत्तिरीयसंहिता – 2.4.7, तैत्तिरीयसंहिता – सम्पादक– श्रीपाददामोदर सातवलेकर, प्रकाशक – स्वाध्याय मण्डल – पारडी गुजरात, पंचमसंस्करण – युगाब्द – 5100, ई. 1999
13. ऋग्वेदः – 1.161.14, सायणभाष्यकृत ऋग्वेदसंहिता, सम्पादक – पण्डित रामगोविन्द त्रिवेदी, प्रकाशक – चौखम्बा विद्याभवन वाराणसी, पो.बा. नं. 1069, वाराणसी – 221001, पुनर्मुद्रितसंस्करण – 2011, भाग – 1-5 तक।
14. गीता – 3.14 श्रीमद्भगवद्गीता शाङ्करभाष्यसहित, अनुवादकः – श्रीहरिकृष्णदास गोयन्दका, प्रकाशक– गीताप्रेस, गोरखपुर – 273005, संस्करण – तैंतीसवाँ पुनर्मुद्रण, सं. 2071
15. कालिकापुराणम् – 31.40 कालिकापुराणम्, Editor – B.N.Shastri, Published By – Nag Publishers Delhi, Edition – First – 1993.

16. कालिकापुराणम् – 21.16 कालिकापुराणम्, Editor– B.N.Shastri, Published By – Nag Publishers Delhi, Edition – First – 1993.
17. ऋग्वेदः – 1.89.1 सायणभाष्यकृत ऋग्वेदसंहिता -, सम्पादक – पण्डित रामगोविन्द त्रिवेदी, प्रकाशक – चौखम्बा विद्याभवन वाराणसी, पो.बा. नं. 1069, वाराणसी – 221001, पुनर्मुद्रितसंस्करण –2011, भाग– 1-5 तक।
18. बृहत्संहिता – 21.37 वराहमिहिरविरचिता बृहत्संहिता, व्याख्याकारः – पण्डित श्री अच्युतानन्द झा, प्रकाशक- चौखम्बा विद्याभवन, पो. बा. नं. 1069,वाराणसी – 221001, संस्करण- 2007ई.।